# Hingu

**हिङ्ग्वत्युग्ररसं स्यादत्युग्रं रामठं च शतवेधि ।**
**बाह्लीकं जन्तुघ्नं रक्षोघ्नं सूपधूपनं जरणम् ॥**
**उग्रं जतुरसं बस्तसिंहिकं बाह्लीकोद्भवम् ।**
**निगूढगन्धं सूपेष्टं निर्यासश्रेष्ठमित्यपि ॥ (Aa ma)**

Hingu is called as Atyugra, Ugra, Ramatha, Satavedhi, Bahlika, Jantughna, Raksoghna, Supadhupana, Jarana, Jaturasa, Bastisimhika, Bahlika, Nigudagandha, Supesta, Niryas sresta.

**हिङ्गूग्रगन्धं भूतरिर्बाह्लीकं जन्तुनाशाम् ।**
**शूलगुल्मादिरक्षोघ्नमुग्रवीर्यं च रामठम् ॥**
**अगूढगन्धं जरणं भेदनं सूपधूपनम् ।**
**दीप्तं सहस्रवेधीति ज्ञेयं पञ्चदशाभिधम् ॥ (Rjn)**

Hingu is also called as Ugragandha, Bhutihi, Bahlika, Jantunasana, Sulagulmadi raksoghnam, Ugravirya, Ramatha, Agudhagandha, Jarana, Bhedana, Supadhupana, Dipta, Sahasravedhi.

**हिङ्गुष्णं पाचनं रुच्यं तीक्ष्णं वातवलासहृत् ।**
**शूलगुल्मोदरानाहकृमिघ्नं पित्तवर्धनम् ॥**
**स्त्रीपुष्पजननं बल्यं मूर्च्छापस्मारहृत् परम् । (Bpn)**

Hingu is rucya, tiksna in guna, usna in veerya, alleviates vata, increases pitta, is pacana, balya, cures sula, gulma, udara, anaha, krmi, murccha, apsmara and stri puspa janana.

**लघूष्णं पाचनं हिङ्गु दीपनं कफवातजित् ।**
**कटुस्निग्धं सरं तीक्ष्णं शूलाजीर्णविबन्धनुत् ॥ (Su.S.)**

Hingu is katu in rasa, laghu, tiksna, snigdha, sara in guna, usna in veerya, alleviates kapha and vata, is dipana, cures sula, ajirna and vibandha.

**हिङ्गूष्णं कटुकं हृद्यं सरं वातकफो कृमीन् ।**
**हन्ति गुल्मोदराध्मानबन्धशूलहृदामयान् ॥ (Dhn)**

Hingu is katu in rasa, usna in veerya, sara in guna, alleviates vata and kapha, is hrdya, cures krmi, gulma, udara, adhmana, vibandha, sula and hrdaya amaya.

**हृद्यं हिङ्गु कटुष्णं च कृमिवातकफापहम् ।**
**विबन्धाध्मानशूलघ्नं चक्षुष्यं गुल्मनाशनम् ॥ (Rjn)**

Hingu is katu in rasa, usna in veerya, alleviates vata and kapha is hrdya, caksushya, cures krmi, vibandha, adhmana, sula and gulma.

**बाह्लीकं पित्तलं चोष्णं हृद्यं तिक्तं परं कटु ।**
**लघुतीक्ष्णं रुचिकरं पाचकं चाग्निदीपकम् ॥**
**स्निग्धं मलस्तम्भकरं श्वासकासकफापहम् ।**
**आनाहाध्मानगुल्मघ्नं शूलहृद्रोगनाशनम् ।**
**वातञ्चाजीर्णकं जन्तूनुदरं चैव नाशयेत् ॥ (Nir)**

Bahlika is tikta, katu in rasa, tiksna, laghu, snigdha in guna, usna in veerya, increases pitta, is hrdya, rucikara, pacaka, agni dipaka, malastambhakara, cures svasa, kasa, anaha, adhmana, gulma, sula, hrdroga, ajirna, jantu and udara

**हृद्यं हिङ्गु कटुष्णञ्च कृमिवातकफापहम् ।**
**विबन्धाऽऽनाहशूलघ्नं चक्षुष्यं गुल्मनाशनम् ॥ (C.S)**

Hingu is katu in rasa, usna in veerya, alleviates kapha, is hrdya, caksushya, cures krmi, vata, vibandha, adhmana, anaha, sula and gulma

**हिङ्गूष्णं वह्निमान्द्यघ्नं पाचनं कफवातजित् ।**
**कटुस्निग्धरसं तीक्ष्णं भूतघ्नं पित्तकोपनम् ॥ (Sgn)**

Hingu is katu in rasa, snigdha, tiksna in guna, usna in veerya, alleviates kapha, vata and increases pitta, is vahnimandyaghna, pacana and bhutaghna

**हिङ्गूष्णं तिक्तकटुकं रसे पाके च दीपनम् ।**
**लघु वातकफानाहशूलगुल्माग्निमान्द्यजित् ॥**
**पाचनं कृमिहृद्रोगकासश्वासोदरार्तिनुत् । (Kdn)**

Hingu is tikta and katu in rasa, laghu in guna, usna in veerya, katu in paka, is dipana, pacana, alleviates vata and kapha, cures anaha, sula, gulma, agnimandya, krmi, hrdroga, kasa, svasa, udara and arti .

## शोधनम् (Sodhanam)

**अङ्गारस्थे लौहपात्रे सघृते रामठं क्षिपेत् ।**
**चालयेत् किञ्चिदारक्तवर्णे योगुषु योजयेत् ॥ (A.S)**

Sodhana:
Angara Loha patra is taken in which ghrta and Hingu are added and subjected to Calana till it becomes slightly Arakta varna after which it is to be used.